परमस्तुतिः

मौक्तिकांकुरकल्पदंष्ट्रमुखाम्बुजं प्रलयाम्बुजं
चक्रशङ्खवराभयच्छविमत्करं सुयशस्करम् ।
रत्नराजिविराजिवृत्तशिरोधरं धरणीधरं
पोत्रिरूपिणमच्युतं प्रणतोस्मि तं सुखदस्मितम् ॥ १॥

अङ्कहीननिशेशबिम्बसमाननं निजमाननं
शङ्खमाल्यसुबोधपुस्तकधारिणं मधुवैरिणम् ।
कुंकुमाङ्कितचन्दनोज्जवलकन्धरं श्रुतिमन्दिरं
किङ्करीकृतविश्वमश्वमुखं भजत्सुखदं भजे ॥ २॥

नीलशैलविशालवप्रलसङ्गुजान्तरसङ्गुजा-
बाल्यमानुषसक्तभूललनाश्रमघ्न जितश्रम ।
मालतीमणिमंजुमाल्य सरोजनेत्र गुरो जने
कोलरूप भवन्तमीश नतोऽस्मि तं सुखदस्मितम् ॥ ३॥

हारशोभिविशालवक्षसमीश्वरं तमनश्वरं
वारिजातसुजातपत्रविलोचनं कृतसेचनम् ।
शारदाम्बुदसन्निभं सकलोन्नतं सुजनैर्नतं
पारवर्जितशौर्यमश्वमुखं भजत्सुखदं भजे ॥ ४॥

जातरूपमयाग्र्यमध्यविभूषणं भवभीषणम
पीतवस्त्रविषक्तसद्रशनोर्जितं मलवर्जितम् ।
आततायिसुरारिसङ्घयभङ्गदं कनकाङ्गदं
ख्यातसूकररूपिणं प्रणतोऽस्मि तं सुखदस्मितम् ॥ ५॥

पद्मरागविरागकिङ्किणिमेखलाञ्चितमेखला
साध्य बुद्धिरियं वरोदरबन्धन स्मरतां धन ।
त्वाद्य चिन्तयदुद्यदर्कसमाम्बरं गतडम्बरं
तद्वराय भवन्तमश्वमुखं भजत्सुखदं भजे ॥ ६॥

मृद्विभेन्द्रकरोपमाङ्गवल्लभं सुरवल्लभं
स्निग्धजानुयुगं मनोहरजङ्घमुद्धृतजङ्गमम् ।
पद्मशोभिपदानखीकृतनागमान्यघनागमा-
वेद्यमद्भुतसूकरं प्रणतोस्मि तं सुखदस्मितम् ॥ ७॥

वर्तुलोरुयुगं मनोरमवृत्तजानुमवृत्तजा
स्तुत्यकोमलपुष्टजङ्घमहीनतल्पमहीनतम् ।
रक्तशारदचारुपद्मलसत्पदं निगमास्पदं
दैत्यवार्धिमहौर्वश्वमुखं भजत्सुखदं भजे ॥ ८॥

वादिराजयतीरिता हयवक्त्रभूधरवक्त्रभू
र्वेदवागिव पावनी परमस्तुतिर्गुणविस्तृतिः ।
सादरं पठतां सतां हरिपादपेशलपादपे
साधुभक्तिलतां स्थिरीकुरुतेतरामवृतेतरा ॥ ९॥

इति श्रीमद्वादिराजपूज्यचरणविरचिता

परमस्तुतिः सम्पूर्णा

भारतीरमणमुख्यप्राणान्तर्गत श्रीकृष्णार्पणमस्तु